श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्लोकद्वयम् श्लोकत्रयम् च ॥

*This document[*] has been prepared by*

***Sunder Kidāmbi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्लोकद्वयं श्लोकत्रयं च ॥

## ॥ श्लोकद्वयम् ॥

ग्राहग्रस्ते गजेन्द्रे रुवति सरभसं तार्क्ष्य मारुह्य धावन्
व्याघूर्णन् माल्यभूषा वसन परिकरो मेघ गंभीर घोषः।
आबिभ्राणो रथाङ्गं शरमसिमभयं शङ्ख चापौ सखेटौ
हस्तैः कौमोदकी मप्यवतु हरिरसा वंहसां संहतेर्नः॥ १॥

नक्राक्रान्ते करीन्द्रे मुकुळित नयने मूल मूलेतिखिन्ने
नाहं नाहं नचाहं न च भवति पुनस्तादृशो मादृशेषु।
इत्येवं त्यक्तहस्ते सपदि सुरगणे भाव शून्ये समस्ते
मूलं यत्प्रादुरासीत् स दिशतु भगवान् मङ्गळं सन्ततं नः॥ २॥

## ॥ श्लोकत्रयम् ॥

प्रातः स्मरामि भवभीति महार्ति शान्त्यै
नारायणं गरुडवाहनमञ्जनाभम्।
ग्राहाभिभूत मदवारण मुक्तिहेतुम्
चक्रायुधं तरुणवारिज पत्रनेत्रम्॥ १॥

प्रातर्नमामि मनसा वचसा च मूर्ध्ना
पादारविन्दयुगळं परमस्य पुंसः।
नारायणस्य नरकार्णव तारणस्य
पारायणप्रवण विप्रपरायणस्य॥ २॥

प्रातर्भजामि भजतामभयङ्करं तम्
प्राक्सर्वजन्मकृत पापभयापनुत्यै।

यो ग्राहवक्त्र पतिताङ्घ्रि गजेन्द्रघोर
शोक प्रणाशनकरो धृतशङ्खचक्रः ॥ ३ ॥

श्लोकत्रयमिदं पुण्यं प्रातरुत्थाय यः पठेत्।
लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः ॥ ४ ॥

॥ इति श्लोकद्वयं श्लोकत्रयं च॥